International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(4): 36-41
© 2022 IJSR
www.anantaajournal.com
Received: 14-03-2022
Accepted: 18-06-2022

**तारा-गुप्ता**
गवेषिका, संस्कृतविभागः, रायगञ्ज-विश्वविद्यालयः उत्तरदाजपुरम्, पश्चिमवङ्गः, भारत

**Corresponding Author:**
**तारा-गुप्ता**
गवेषिका, संस्कृतविभागः, रायगञ्ज-विश्वविद्यालयः उत्तरदाजपुरम्, पश्चिमवङ्गः, भारत

# राजवंशी-संस्कृतभाषयोर्ध्वन्याश्रितं तुलनात्मकं पर्यालोचनम्

**तारा-गुप्ता**

**प्रबन्धसारः**
साधारणतया विज्ञाने यत्र ध्वनेरालोचना दृश्यते तदेव ध्वनिविज्ञानमिति कथ्यते। ध्वनितत्त्वे को नाम ध्वनिः इति आदौ स्पष्टीकरणीयः। ध्वननमिति ध्वनिः इति व्युत्पत्त्या ध्वन्+इ इति प्रत्ययेन ध्वनिशब्दः निष्पन्नः। शब्दः, निनादः, रवः, निर्घोषः स्वनः इति ध्वनेर्नामान्तरम्। आङ्गलभाषायां कथ्यते यत् Sound तदेव संस्कृते वङ्गभाषायां राजवंशीभाषायां च ध्वनिरिति। पक्षिनः रवः, भ्रमरस्य गुञ्जनः, करतालिध्वनिः, मानवस्य कण्ठाद् उच्चारितः शब्दो ध्वनिरित्युच्यते। किन्तु भाषाविज्ञाने एते ध्वनयो नालोच्यविषयाः सन्ति। मानवानां वाग्यत्रेण उच्चारितः शब्दो ध्वनिर्वा आलोच्यविषयो ध्वनिविज्ञाने। अयं ध्वनिः वाग्ध्वनिः स्वनो वा (Phone) कथ्यते। वयं यान् स्वनान् श्रुतवन्तस्तेषां सर्वेषां स्वनानां समानभूमिका सर्वत्र नास्ति। अस्मिन् प्रबन्धे पुरातनसंस्कृतभाषा नवीनराजवंशीभाषा चेत्यनयोर्भाषयोः वाग्ध्वनेर्भमिका, तयोर्भाषयोः ध्वनिगतसादृश्यवैशादृश्यमालोचितं भविष्यतीति।

**सूचकशब्दाः** ध्वनिः, ध्वनिविज्ञानम्, स्वरध्वनिः, व्यञ्जनध्वनिः, संस्कृतभाषा, राजवंशीभाषा, ध्वनिगतसादृश्यवैशादृश्यम्।

**मूलप्रबन्धः**
**उपोद्घातः**

‘अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥’ इति।

(वाक्यपदीयम्, १/१)

‘नाना भाषा नाना मत नाना परिधान, विविधेर माझे देख मिलन महान्’ इति वङ्गकविवचनानुसारं भारतवर्षे विविधभाषाव्यवहारिणो जना निवसन्ति आ प्राचीनकालात्। तासु भाषासु अन्यतमा भाषा भवन्ति संस्कृतम्, प्राकृतम्, हिन्दी, गुजराटी, कन्नड, मालायलम् चेत्यादिभाषाः। उक्तभाषासु मुख्या भाषा खलु संस्कृतं राजवंशी चेति। अत्र राजवंशीभाषाया उपरि संस्कृतभाषायाः प्रभाव उपस्थापितो भविष्यति विविधशास्त्रदृष्ट्या। अत्रेयं चर्चा न भारतवर्षे न वा वङ्गे, केवलमेव वङ्गस्योत्तरांशे विशेषत उत्तरवङ्गे। उत्तरवङ्ग इत्युक्ते कोचविहारः, जलपाइगुडि, दार्जिलिं शिलिगुडि, रायगञ्जः, उत्तरदिनाजपुरम्, दक्षिणदिनाजपुरम्, मालदह इति मण्डलानि बोद्धव्यानि। राजवंशीभाषायाः प्रचलनं दृश्यते एतेषु मण्डलेषु एव।
राजवंशीभाषाव्यवहारिणो जना अधिकं वर्तन्ते कोचविहारमण्डले। इतोऽपि च असमराज्ये, मेघालयराज्ये, विहारराज्ये वांलादेशे नेपालदेशे राजवंशीभाषाया विस्तृतिरस्ति। राजवंशीभाषाया विन्दुस्थले अविभक्तगोयालपाडाकोचविहारप्रदेशौ इति वक्तुं शक्यतेति।

**राजवंशी-संस्कृतस्वरध्वन्योः तुलनात्मकं पर्यालोचनम्**
स्वरध्वनेः वैचित्र्यं प्रधानतया द्विविधं विषयमपेक्षते। प्रथमो विषयो हि स्वरध्वनेः उच्चारणकालस्य परिमापनम्, द्वितीयो विषयो हि स्वरध्वनरुच्चारणसमये श्वासवायोः गमनागमनयोः मार्गस्य आकृतिः। स्वरध्वनेः वैचित्र्यं प्रधानतया एतस्मिन् विषयद्वये सापेक्षम्। प्रथमविषयमाश्रित्य ध्वनेः यो श्रेणीविभागोऽस्ति, स विभागः परिमापाश्रितो मात्राश्रितो वा विभाग (Quantitative Classification) इत्युच्यते। एवं द्वितीयं विषयम् आश्रित्य ध्वनेः यो श्रेणीविभागः अस्ति, स विभागो गुणाश्रितः प्रकृत्याश्रितो वा श्रेणिविभाग (Qualitative Classification) इत्युच्यते। उच्चारणसमये मुखगलविवराद्यभ्यन्तरे श्वासवायोः गमनागमनयोः मार्गस्य आकृतेः परिवर्त्तनेन श्वासवायोः गमनो मार्गश्च नियन्त्रितो भवतः, तेन च स्वरध्वनिषु प्रधानतः गुणस्य पार्थक्यं परिलक्ष्यते।परं स्वरध्वनेः उच्चारणकाले समयपरिमापस्य यत्पार्थक्यं भवति, तेन स्वरध्वनिषु गुणस्य पार्थक्यं किमपि तथा न परिलक्ष्यते।

यदि पार्थक्यं किमपि भवति, तद् अतिसामान्यं, अस्माभिः अपि तद् अवगन्तुं शक्यते, मूलतः तत्र उच्चारणसमयमात्रस्य एव पार्थक्यम्। एतदपि अवधेयम्, एक एव स्वरध्वनिः बहुसमयेन उच्चारितः सन् दीर्घस्वरः, स्वल्पेन समयेन उच्चारितः ह्रस्वस्वर इति उदीर्यते।

स्वरध्वनेः गुणाश्रितः प्रकृत्याश्रितो वा श्रेणीविभाग उच्चारणसमये मुखगलविवराद्यभ्यन्तरे श्वासवायोः गमनागमनयोः मार्गस्य आकृतौ सापेक्षो भवति। श्वासवायोः गमनागमनयोः मार्गस्य आकृतिरपि सापेक्षा रसनाया अवस्थाने, मुखविवरस्थस्य शून्यस्थानस्य परिमापे तथा ओष्ठस्य आकृतौ। जिह्वा मुखाभ्यन्तरे वर्त्तमाना उपरि, नीचैः, पुरतः, पश्चात् विविधे स्थाने चलनशीला सती, तथा ओष्ठः नानाविधाम् आकृतिम् अनुसृत्य श्वासवायोः गमनं गमनमार्गं च नियमयतः। तदा एव स्वरध्वनौ गुणवैचित्र्यं प्रादुर्भवति। तदनन्तरं च वयं नानाविधान् स्वरध्वनीन् श्रोतुं पारयामः। अतः स्वरध्वनेः मानदण्डत्रयं यथा –

क. रसनाया अवस्थानम्,
ख. मुखविवरे शून्यस्थानस्य परिमापः,
ग. ओष्ठस्य आकृतिः च।

मौलिकस्वरध्वनेः पर्यालोचनेन यथा विविधभाषासु स्वरध्वनेः उच्चारणे जिह्वाया अवस्थानम्, ओष्ठस्य आकृतिश्च निर्देष्टुं शक्यते तथैव मौलिकस्वरध्वनिना सह तुलनात्मकेन पर्यालोचनेन विविधभाषायाः स्वरध्वनीनां श्रेणीविभागः अपि लब्धुं शक्यते।

**राजवंशीस्वरध्वनि**







| | | | सम्मुख (Front) | केन्द्रः (Central) | पश्चात् (Back) |
|---|---|---|---|---|---|
| | | | प्रसारितः (Spread) | मध्यस्थः (Neutral) | कुञ्चितः (Rounded) |
| उच्चः (High) | संवृतः (Close) | | इ (i) | | उ (u) |
| उच्च-मध्यः (High-mid) | अर्धसंवृतः (Half-close) | | ए (e) | | ओ (o) |
| उच्च-मध्य-निम्नः (High-mid low) | अर्धसंवृतः (Half close) | | आ (ae) | | अ (o) |
| निम्न-मध्यः (Low-mid) | अर्धविवृतः (Half open) | | | | अ (a) |
| निम्नः (Low) | विवृतः (Open) | | | आ (a) | |




यस्य स्वरध्वनेः उच्चारणसमये रसना पुरतः प्रसारिता भवति, स स्वरध्वनिः एव सम्मुखस्वरध्वनिः (Front Vowel) इति कथ्यते। यथा – राजवंशीस्वरध्वनिषु इ, ए, अया (ie, ae) इति तथा संस्कृतस्वरध्वनयः इ, ए, एं, अ (i, e, e, a) इति।

येषां स्वरध्वनीनाम् उच्चारणकाले जिह्वा पश्चाद्भागे कुञ्चिता भवति ते स्वरध्वनयः पश्चात्स्वरध्वनय (Back Vowel) इति उच्यते। यथा राजवंशीस्वरध्वनिषु अ, ओ, ऐ, उ (a, o, j, u) इति तथा संस्कृतस्वरध्वनिषु ऊ, ओ, आँ, आ (u, o, j, a) इति।

येषां स्वरध्वनीनाम् उच्चारणं रसनायाः सम्मुखस्वर-पश्चाद्वर्तिस्वरयोः मध्यवर्तिनः स्थानाद् भवति ते स्वरध्वनयः केन्द्रियस्वरध्वनय (Central Vowel) इति कथ्यते। यथा राजवंशीस्वरध्वनिषु आ (ā) इति, संस्कृतस्वरध्वनिषु अ, आ (a, ā) इति।

येषां स्वरध्वनीनाम् उच्चारणसमये जिह्वा स्वरध्वनेः सीमायां सर्वाधिकसमीपतमे स्थाने तिष्ठति, ते स्वरध्वनयः उच्चस्वरध्वनय (High Vowel) इति कथ्यते। यथा

उच्चस्वरध्वनिषु प्रसिद्धाः राजवंशीभाषायाम् इउ (iu) इति, संस्कृते अपि इउ इत्यस्य उच्चारणे व्यवहारः प्राप्यते।

येषां च स्वरध्वनीनाम् उच्चारणसमये जिह्वा उच्चारणस्थानस्य सर्वाधिकाधस्तमे स्थाने अवनमय्य ध्वनय उच्चार्यन्ते, ते एव स्वरध्वनयः निम्नस्वरध्वनय (Low Vowel) इति कथ्यते। यथा राजवंशीभाषायां आ (ā) इति ध्वनिः, संस्कृतस्वरध्वनिषु अ, आ (a, ā) इति।

मुखविवरस्य अभ्यन्तरे स्थितस्य शून्यस्थानस्य परिमाणम् आश्रित्य स्वरध्वनिः श्रेणीचतुष्टये विभक्तुं शक्यते यथा – संवृतः, विवृतः, अर्धसंवृतः अर्धविवृतश्च। येषां ध्वनीनाम् उच्चारणसमये रसना स्वरध्वन्युच्चारणस्थानेषु ऊर्द्ध्वतमे स्थाने विद्यमाना भवति, जिह्वायाः मुखविवरस्य तालुदेशम् ऊर्द्ध्वदेशं प्रति वा अग्रगामित्वात् मुखाभ्यन्तरस्थितं शून्यस्थानं प्रायेण पूर्णमेव भवति, ते एव ध्वनयः संवृतस्वरध्वनय इति उच्यन्ते। वस्तुतस्तु सर्वे उच्चस्वरध्वनयः एव संवृतस्वरध्वनयः (Closed Vowel)। उदाहरणं यथा – राजवंशीस्वरध्वनिषु इ,उ (i, u) इति।

एवं, रसना अधस्तमे स्थाने अवनमय्य स्वाभाविकीं स्थितिं स्थापयन् मुखस्य अधोभागात् हनूदेशात् मुखस्य ऊर्द्ध्वदेशस्य दूरत्वं निर्माय मुखाभ्यन्तरे शून्यं स्थानं विरच्य केचन ध्वनय उच्चार्यन्ते। एतादृशेन उपायेन ये स्वरध्वनय उच्चार्यन्ते, ते एव स्वरध्वनयः विवृतस्वरध्वनय (Open Vowel) इति उच्यन्ते। वस्तुतस्तु सर्वे निम्नस्वरध्वनय एव विवृतस्वरध्वनयः। उदाहरणं यथा – राजवंशीस्वरध्वनिषु आ (ā) इति, संस्कृतस्वरध्वनिषु अ, आ (a, ā) इति।

संवृतस्वरध्वनि-विवृतस्वरध्वन्योः मध्यवर्त्तिनौ भवतः अर्धसंवृतस्वरध्वनिः अर्धविवृतस्वरध्वनिश्च। संवृतस्वरध्वनेः अवस्थानात् विवृतस्वरध्वनेः अवस्थानं यावत् यत् शून्यं स्थानम्, जिह्वया निम्नवर्तिहनूना चेत् तस्य शून्यस्थानस्य भागत्रयस्य द्वौ भागौ एव पूर्णौ भवतः तदा तेन क्रमेण तया विधया च उच्चारिताः स्वरध्वनयः अर्धसंवृतस्वरध्वनय (Half-closed Vowel) इति कथ्यते। उच्च-मध्य-स्वरध्वनीनाम् उच्चारणसमये अपि एतादृशावस्थायाः सृष्टिः भवति। यथा राजवंशीस्वरध्वनिषु अ, अय़ा इति। तथैव संवृतस्वरध्वनेः अवस्थानात् विवृतस्वरध्वनेः अवस्थानं यावत् यत् शून्यं स्थानम्, निम्नभागात् जिह्वया निम्नवर्तिहनूना चेत् तस्य शून्यस्थानस्य भागत्रयस्य निम्नवर्ती एक एव भागः पूर्णः भवति, उपरितः भागत्रयस्य द्वौ भागौ एव उन्मुक्तौ भवतः तदा तेन क्रमेण तया विधया च उच्चारिताः स्वरध्वनयः अर्धविवृतस्वरध्वनय (Half-open Vowel) इति कथ्यते। सर्वे निम्न-मध्य-स्वरध्वनय एव अस्यां श्रेण्याम् अन्तर्गच्छन्ति। उदाहरणं यथा – राजवंशीस्वरध्वनिषु अ (a) इति।

ओष्ठस्य आकृतिम् अनुसृत्य स्वरध्वनयः पुनः द्विधा विभक्तुं शक्यते यथा – प्रसारितस्वरध्वनिः **(**Spread/ Unrounded Vowel**),** कुञ्चितस्वरध्वनिश्च (Rounded Vowel) । ओष्ठम् उभयतः प्रसार्य येषां स्वरध्वनीनाम् उच्चारणं क्रियते, ते एव प्रसारितस्वरध्वनय **(**Spread/ Unrounded Vowel**)** इति कथ्यन्ते। उदाहरणं यथा – राजवंशीस्वरध्वनिषु इ, ए, अया (i, e, ae) इति। किन्तु उभयतः न प्रसार्य, केवलम् ओष्ठम् कुञ्चितं वर्त्तुलाकारकं विधाय येषां स्वरध्वनीनाम् उच्चारणं क्रियते, ते एव कुञ्चितस्वरध्वनय (Rounded Vowel) इति कथ्यन्ते। यथा – उ, ओ, अ, अ इति एते राजवंशीस्वरध्वनयः। पश्चात्स्वरत्वे अपि एतेषाम् उच्चारणसमये ओष्ठः कुञ्चितो न भवति। इति हेतौ एते अकुञ्चितपश्चात्स्वरध्वनय (Unrounded Back Vowel) इति उच्यन्ते।

क्वचित् कदाचित् स्वरध्वनीनाम् उच्चारणसमये ओष्ठः स्वाभाविकस्थितौ एव तिष्ठति, अर्थात् ओष्ठस्य प्रसारणम् आकुञ्चनं वा न भवति, तादृशस्थितौ उच्चारिताः स्वरध्वनयः स्वाभाविकस्वरध्वनयः मध्यस्थस्वरध्वनय (Neutral Vowel) इति वा कथ्यन्ते। अस्य उदाहरणं यथा – आ (ā) इति। स्वरध्वनिः केन्द्रियस्वरध्वनि (Central Vowel) इति नाम्ना अभिधीयते।

राजवंशीभाषायाः स्वरवर्णाः (स्वरवर्णानां लेख्यं प्रतीकं चिह्नं वा) भवन्ति – अ, आ, इ, ई, उ, ऊ, ऋ, ए, ऐ, ओ औ च। मुखगह्वरे उच्चारणकाले राजवंशीस्वरध्वनिषु अनेकेषां ध्वनीनाम् स्वरध्वनित्वेन उच्चारणं न भवति। एतस्मिन् प्रसङ्गे अधस्तात् सूची प्रदीयते –

| राजवंशीमुखगह्वरे उच्चारिताः स्वरध्वनयः | स्वरध्वनीनां लेख्यं प्रतीकम् | संस्कृतभाषायाः स्वरवर्णाः |
|---|---|---|
| अ | अ | अ |
| अ | - | आ |
| आ | आ | इ |
| इ | इ | ई |
| ई | - | उ |
| उ | उ | ऊ |
| - | ऊ | ऋ |
| - | ऋ | लृ |
| ए | ए | ए |
| - | ऐ | ऐ |
| उ | ओ | ओ |
| - | औ | औ |
| अय़ा | - | |

उपरि सूच्याम् एव स्पष्टं दृश्यते यत् केचन स्वरवर्णाः स्वरध्वनिमालायाः सूच्यां न सन्ति। एतस्य यतो हि, एते स्वरध्वनयः राजवंशिभिः लिखिताः, परन्तु भाषायां न कदाचित् अपि व्यवहृताः। अपरतः, स्वरध्वनिषु अ तथा अय़ा इति स्वरध्वनिद्वयी भाषायां प्रयुक्तो व्यवहृतो दृश्यते, किन्तु अद्यावधि तयोः लेख्यं प्रतीकं चिह्नं वा निर्देष्टुं न शक्यते।

अ इति मौलिकः स्वरध्वनिः अ-ओवर्णयोः उच्चारणस्थानयोः मध्यवर्तिनः स्थानात् उच्चारितो भवति। यद्यपि संस्कृतस्वरध्वनिषु इकार-ईकारयोः ह्रस्व-दीर्घयोः महत् पार्थक्यं विद्यते, तथापि राजवंशीभाषायां, विशेषतः भाषायाम् उच्चारणसमये इकार-ईकारयोः तावत् किमपि पार्थक्यं नास्ति। प्रसङ्गत उल्लेख्यं राजवंशीभाषायां दिल्ली-दिल्लि, चीन-चिन इत्येवम् उभयविधे आनुपूर्विके एव प्रचलिते, यथार्थे साध्व्यौ च। परन्तु संस्कृतभाषायां दिल्ली >देहली, चीन इत्येव आनुपूर्विका साध्वी, प्रचलिता च। परं राजवंशीभाषायाम् इकार-ईकारयोः स्थान-आयतन-गुरुत्वानां ह्रास-वृद्धी न परिगण्येते। भाषातत्त्वे प्रसिद्धम् अस्ति, ह्रस्व उकारः दीर्घ ऊकारश्च उभे एव एकस्मिन् ध्वनिवर्गे अन्तर्भवतः। उकार-ऊकार-सम्बन्धी पृथग् आनुपूर्विविधिः यद्यपि अस्ति एव, तथापि राजवंशीभाषायां तस्य विधेः प्रयोगे सार्थकं रूपदानं न परिलक्ष्यते। एतेन भविष्यति काले राजवंशीभाषायाः स्वरध्वनिमालायां दीर्घ ऊकारः स्थास्यति एव इति निश्चयेन दृढप्रत्ययेन न कश्चिदपि वक्तुं शक्नोति। यथा ऋ-कारः राजवंशीभाषायाः स्वरध्वनिमालायां विद्यमानः सन्नपि व्यवहारे उच्चारणे नास्ति एव। राजवंशीभाषायां ऋकारध्वनिः इ-ध्वनौ परिणमते यथा – ऋषिः > इषिः। परन्तु संस्कृभाषायां तथा न भवति। किञ्च, उच्चारणसौविध्याय ऋ-ध्वनेः विश्लेषेण र् इ इत्येवम् परिगणनम् अपि नोचितम्। वस्तुतस्तु तेन ऋध्वनेः स्वरध्वनित्वम् एव अपगच्छति। एवम् ऐ स्वरध्वनेः विश्लेषेण तत्र अ इ इति प्राप्यते, औ इति स्वरध्वनेः विश्लेषेण च प्राप्यते अ उ इति। एतस्मात् कारणात् राजवंशिजनाः ऐध्वनेः तथा औध्वनेः अपि यथायथतया उच्चारणं न कुर्वन्ति। यथा – चौकिदार > चकिदार इति। किन्तु एते स्वरध्वनयः संस्कृतभाषायां यथायथम् एव उच्चार्यन्ते। अनेके राजवंशीभाषागवेषकाः संस्कृतभाषायां स्वरध्वनिमालाम् अनुसृत्य राजवंशीस्वरध्वनिषु लृकारस्य तथा दीर्घलृकारस्य अन्तर्भागं कारयन्ति। परन्तु लृकारस्य तथा दीर्घलृकारस्य व्यवहारः राजवंशिभिः कदाचिदपि न क्रियते। न कदापि एतयोः उच्चारणम् अपि क्रियते। अतः भविष्यत्काले राजवंशीभाषायाः स्वरध्वनिमाला कथं भवेत् इति तु आग्रहास्पदविषयः समेषाम्।

स्वरवर्णस्य सूची संस्कृतभाषायाः स्वरध्वनिसूचीम् अनुसृत्य यद्यपि प्रदर्श्यते राजवंशिभिः तथापि उपरि विहितात् पर्यालोचनाद् एतत्स्पष्टं यत् राजवंशीभाषायां सर्वे स्वरध्वनयः यथायथतया न व्यवह्रियन्ते एव। यथा –

| राजवंशीभाषा | संस्कृतभाषा |
|---|---|
| दिल्लि/ दिल्ली | दिल्ली/देहली |
| चिन/ चीन | चीन |
| इसि/ इशि | ऋषि |
| चकिदार | चौकिदार (वङ्गभाषा) |

**राजवंशीभाषायाः व्यञ्जनध्वनयः**

राजवंशीभाषायाः व्यञ्जनध्वनयो भवन्ति क, ख, ग,घ, ङ, च, छ, ज, झ, ञ, ट, ठ, ड, ढ, त, थ, द, ध, न, प, फ, ब, भ, म, र, ल, श, स, ह, व, य,.... इति।

संस्कृतभाषायाः व्यञ्जनध्वनयो भवन्ति क, ख, ग,घ, ङ, च, छ, ज, झ, ञ, ट, ठ, ड, ढ, ण, त, थ, द, ध, न, प, फ, ब, भ, म, य, र, ल, व, श, ष, स, ह इति।

उपरि प्रदत्तात् सूचीद्वयात् एव एतत्स्पष्टं यत् संस्कृतभाषायां विद्यमानाः सर्वे ध्वनयः राजवंशीभाषायां न सन्ति। यथा संस्कृतभाषायां ण-ध्वनिः अस्ति, परन्तु वर्तमाने राजवंशीभाषायां ण-ध्वनिः न उच्चार्यते एव, ण-ध्वनेः नध्वनिः एव। तथैव संस्कृभाषायां प्रसिद्धस्य य-ध्वनेः उच्चारणं राजवंशीभाषायां ज-ध्वनिसदृशम् एव भवति। यद्यपि राजवंशीजनाः श-ष-स-ध्वनीनां पृथक्प्रतीकं व्यवहरन्ति लिखनसमये, तथापि उच्चारणकाले प्रायश एव ते श-ध्वनिम् एव उच्चारयन्ति। परन्तु संस्कृतभाषायां श-ष-स-ध्वनीनां यथा लेख्यं प्रतीकं भिन्नम्, तथैव तेषाम् उच्चारणं तथा उच्चारणस्थानम् अपि पृथक् एव। यथा शध्वनिः तालव्यः, श्मशानः उदाहरणम् अत्र। स-ध्वनिः दन्त्यः यथा सन्तानः। एवं ष-ध्वनिः मूर्धन्यः यथा षष्ठः। राजवंशीभाषायाम् अनुस्वारस्य पृथगस्तित्वं नास्ति, अनुस्वारस्य उच्चारणं ङ-ध्वनिसदृशम् एव भवति।

व्यञ्जनवर्णैः संगठितानां राजवंशीशब्दानां सूची तथा तेषां शब्दानां संस्कृतभाषायाम् अर्थः –

क – पदस्य आदिमे भागे क-व्यञ्जनध्वनेः व्यवहारस्य उदाहरणं यथा –

| राजवंशीभाषा | राजवंशीभाषा | संस्कृतम् |
|---|---|---|
| क | काइल | श्वः |
| क > ख | कपाल > खपाल | कपोलः |
| क > ग | शाक > शाग | शाकः |
| क > ग | सकल > सगल | सर्वः |

**ख – पदस्य आदौ भागे ख-व्यञ्जनध्वनेः व्यवहारस्य उदाहरणं (क्वचित् क्ष-ध्वनेः परिणतिः ख-ध्वनिरूपेण, तथाविधोच्चारणात्) यथा –**

| राजवंशीभाषा | राजवंशीभाषा | संस्कृतम् |
|---|---|---|
| ख > क | चोख > चोक | चक्षुः |
| ख> क | मुख > मुक | मुखम् |
| क्ष > ख | पक्षि > पोखखि | पक्षिः |
| क्ष > ख | दक्षिण > दोक्खिन > दोखिन | दक्षिणः |

ग – पदे ग-व्यञ्जनध्वनेः व्यवहारस्य उदाहरणं यथा –

| राजवंशीभाषा | राजवंशीभाषा | संस्कृतम् |
|---|---|---|
| **ग > घ** | **आगुन > आघुन** | **अग्निः** |
| **ग> घ** | **अग्रान > अघ्रान** | **अग्रहायनम्** |

**संस्कृतभाषायां स्वरध्वनिः**




अ – राजवंशीभाषाया अ-ध्वनितः संस्कृतभाषाया अ-ध्वनेः उच्चारणं बहुलांशे पृथक्। राजवंशीभाषायाम् अ-ध्वनिः निम्नमध्यवर्त्ती (Low-middle) अर्धविवृतः (half-open), किन्तु संस्कृते अ-ध्वनिः विवृतः (Low)। किन्तु जिह्वाप्रसारणदिशा उभयत्र एव अ-ध्वनिः पश्चात्स्वरः। तथैव ओष्ठस्य आकृतेः साम्यस्य पर्यालोचनेन उभयत्र राजवंशीभाषायां तथा संस्कृतभाषायाम् अ-ध्वनिः कुञ्चितः (Rounded)।

वङ्गभाषायां तथा राजवंशीभाषायां अ-ध्वनेः उच्चारणं सम्यग् विविच्य एव रवीन्द्रनाथेन उक्तम् आसीत् – वङ्गभाषायाम् अपि अ-स्वरध्वनेः उच्चारणम् अनेकत्र एव ओ-ध्वनि-सदृशम् भवति। यथा राजवंशीभाषायां, अति >ओति, अग्नि >ओग्नि, अधुना >ओधुना इत्येवम्। किन्तु संस्कृते अ-ध्वनेः ओ-ध्वनौ परिणमनं न प्राप्यते। किञ्च, क्वचित् अ-ध्वनेः स्वाभाविकम् एव उच्चारणं भवति इत्यपि तेन परिलक्षितम्।

अ-ध्वनेः एतादृश्या उच्चारणप्रवणतायाः ध्वनितात्त्विकं कारणं विश्लेषयता विजनविहारी-भट्टाचार्य्य-महाभागेन उक्तम् –

प्रथमतः, राजवंशीभाषायां तथा वङ्गभाषायां शब्दस्य पदस्य अन्तिमो वर्णो यदि अ-ध्वनिर्भवति, स च अ-ध्वनिः यदि ग्रस्तो न भवति तर्हि तस्य अ-ध्वनेः उच्चारणं कियदंशे ओ-ध्वनिसदृशं भवति, यथा – मत >मतो, गत >गतो, भाल >भालो इत्येवम्। परन्तु विभक्तिभिः नियन्त्रितत्वात् संस्कृतभाषायां तथा न भवति।

द्वितीयतः, शब्दस्य पदस्य आदौ रेफयुक्तो संयुक्तो वर्णो यदि भवति, तेन संयुक्तवर्णेन सह यदि अ-ध्वनिः निहितो भवति, तदा अपि अ-ध्वनेः उच्चारणम् ओ-ध्वनेः सदृशं भवति। यथा भ्रम >भ्रोम, व्रत> व्रोतो, श्रम >श्रोम, ग्रस्त >ग्रोस्तो, प्रस्थान> प्रोस्थान इत्येवम्। परन्तु संस्कृतभाषायाम् एतेषां उच्चारणे किमपि पार्थक्यं न परिलक्ष्यते, यथा दृग्गोचरं भवति, तथैव उच्चार्यते।

तृतीयतः, येषां शब्दानां पदानां वा संगठनम् एकेनैव उच्चारणसौविध्यजनकेन अक्षरदलेन भवति, तथा पदान्तिमे न्-ध्वनिः भवति तेषु शब्देषु पदेषु वा आदिभागे विद्यमानस्य अ-ध्वनेः उच्चारणम् अपि ओ-ध्वनिसदृशं भवति। यथा मन >मोन, वन> वोन, जन >जोन इत्यादीनि।

चतुर्थतः, शब्दस्य पदस्य वा द्वितीये अक्षरदले य-ध्वनिः तथा क्ष-ध्वनिः तिष्ठति चेत् पदे शब्दे वा विद्यमानः अ-ध्वनेः उच्चारणम् ओ-ध्वनेः उच्चारणसदृशं भवति। ध्वनितात्त्विकानां मते एतस्य कारणं हि य-ध्वनेः तथा क्ष-ध्वनेः अनन्तरम् उच्चारणे द्वित्वभावः समागच्छति। एतेन द्वित्वभावेन एव प्रभावितः सन् अ-ध्वनिः ओ-ध्वनिरूपेण परिणमते। उदाहरणं यथा – दक्ष > दोकखो, यक्ष> योकखो, शल्य> शोल्लो, गव्य > गव्वो, सद्य >शोद्दो, वध्य >वोद्धो इत्येवम्। परन्तु संस्कृतभाषायाम् एतेषाम् दक्ष, यक्ष, शल्, दाव्य, सद्य, वध्य इति एतेषां पदानाम् उच्चारणं स्वाभाविकम् एव भवति, तत्र उच्चारणे द्वित्वभावः ओ-भावो वा न भवति।

पञ्चमतः –येषु शब्देषु द्वे त्रीणि अक्षरदलानि सन्ति तेषु शब्देषु द्वितीये अक्षरदले अ-ध्वनेः उच्चारणम् ओ-ध्वनेः उच्चारणसदृशं भवति। अस्य उदाहरणं यथा आसनम् >आसोन, परम >परोम, चरण >चरोण, तरल > तरोल, वादल> वादोल इत्येवम्। परन्तु संस्कृतभाषायाम् एतेषाम् आसन, परम, चरण, तरल, वादल इति एतेषां पदानाम् उच्चारणं स्वाभाविकम् एव भवति, तत्र उच्चारणे ओ-भावो न भवति।

षष्ठतः – शब्दस्य आदिमे भागे रेफयुक्तः व्यञ्जनवर्णः यदि तिष्ठेत्, तेन व्यञ्जनेन यदि अ-ध्वनिः सन्निहितो भवति तदा तस्य अ-ध्वनेः उच्चारणम् ओ-ध्वनेः उच्चारणसदृशं भवति। यथाप्रथा >प्रोथा, ग्रह> ग्रोह, स्रष्टा >स्रोष्टा, प्रथम >प्रोथम, ग्रहण> ग्रोहण इत्येवम्। परन्तु संस्कृतभाषायाम् एतेषाम् प्रथा, ग्रह, स्रष्टा, प्रथम, ग्रहण इति एतेषां पदानाम् उच्चारणं स्वाभाविकम् एव भवति, तत्र उच्चारणे ओ-भावो न भवति। परन्तु ह्रस्व, ह्रद, क्रय इति एतेषु शब्देषु अस्य नियमस्य व्यभिचारः अपि परिलक्ष्यते।

संस्कृतभाषायाम् अ-ध्वनेः ओ-कारध्वनौ परिणमनस्य प्रणता तथा नास्ति इति उपरि एव पर्यालोचितम्। परन्तु कुत्रचित् शब्दस्य आदिमे भागे रेफयुक्तः व्यञ्जनवर्णः यदि

तिष्ठति, तेन व्यञ्जनेन यदि आ-ध्वनिः सन्निहितो भवति तदा कुत्रचित् राजवंशीभाषायाम् उच्चारणसौविध्याय अ-ध्वनिः संयुज्यते। यथा संस्कृते प्राण इति शब्दः राजवंशीभाषायां पराण इति भवति।

**राजवंशीभाषायाम् अ-ध्वनेः रूपान्तरम् अधः प्रदीयते–**

| राजवंशीभाषा | उदाहरणम् |
|---|---|
| अ > ए | लण्ठन > लेण्ठन |
| अ > उ | हनुमान > हुनुमान |

आ – संस्कृतभाषायाम् आ-ध्वनिः दीर्घस्वरः, परन्तु राजवंशीभाषायां तथा वङ्गभाषायाम् आ-ध्वनिः ह्स्वस्वरः। रवीन्द्रनाथेन स्वकीये ग्रन्थे तस्माद् उक्तम् – संस्कृते दीर्घ-आ-स्वरस्य ह्स्वरूपमेव अ-ध्वनिः। राजवंशीभाषायाम् आ-ध्वनिः ह्स्वरूपेण एव प्रचलितः अस्ति। उदाहरणं यथा – राजा, चाला इत्यादि। अत्र राजवंशीभाषायाम् उच्चारणे आ-ध्वनिः एकमात्रः। संस्कृतभाषायाम् आ-ध्वनिः द्विमात्रः, यथा उच्चारणे दीर्घकालम् अपेक्षते।

राजवंशीभाषायां तथा संस्कृतभाषायाम् उभयत्र आ-ध्वनिः निम्नविवृतस्वररूपेण उल्लिखितः। परन्तु राजवंशीभाषायां वैशिष्ट्यम् एतत् अत्र आ-ध्वनिः केन्द्रीयस्वररूपेण परिचितः।

प्रचलितायां वङ्गभाषाया आ-ध्वनौ महाप्राणता नास्ति। परन्तु संस्कृतभाषायाम् आ-ध्वनिः महाप्राणः। भाषातात्त्विकानां मते वङ्गभाषाया आञ्चलिके उच्चारणे क्वचित् महाप्राणता सुलभा एव। यथा प्रान्तीयायाम् उत्तरवङ्गस्य भाषायाम्, विशेषतः कामरूपोपभाषायाम् आ-ध्वनेः अन्तःश्वासजनिता महाप्राणता प्रायश एव दृग्गोचरीभवति। यथा – काँचा >काच्छा, पन्था >पाहान्था इत्येवम्।

वांग्लादेशप्रदेशे कुमिल्लाया उपभाषासु आद्यस्वरे श्वासाघातात् महाप्राणता प्राप्यते। तेन आद्यः अ-ध्वनिः अपि श्वासाघातं प्राप्य महाप्राणे आ-ध्वनौ परिणतो भवति। यथा –

असुख >आसुख,

अनल >आनल,

अमवस्या> आमावस्या,

अष्ट >आष्ट >आट इत्येवम्।

संस्कृतभाषाया अ-ध्वनिः अपि अनेनैव क्रमेण प्राकृतभाषायां क्वचित् आ-ध्वनौ परिणतो भवति। यथा – संस्कृते अष्टौ, प्राकृते आट्ठ> आट इति, संस्कृते अद्य, प्राकृते आज्ज >आज इत्येवम्।

संस्कृतस्यापेक्षया राजवंशीभाषायां वैशिष्ट्यम् अस्ति अय़ा-ध्वनिस्वीकारेे। अ-ध्वनिम् आ-ध्वनिं च अतिरिच्य पृथक् ध्वनिः भवति अय़ा-ध्वनिः। राजवंशीध्वनितात्त्विकानां मते अय़ा-ध्वनिः उच्च-मध्य-निम्न-अर्धसंवृतध्वनिः। परन्तु संस्कृतभाषायाम् एतस्य ध्वनेः प्रयोगो व्यवहारो वा नास्ति, लेख्यम् प्रतीकमपि नास्ति।

इ – राजवंशीभाषायां, वङ्गभाषायां, तथा संस्कृतभाषायां सर्वत्रैव इ-ध्वनिः उच्चसंवृतः, सम्मुखः प्रसारितश्च। राजवंशीभाषायाम् इ-ध्वनिः क्वचिद् दीर्घः क्वचिद् ह्स्वः, अतः दीर्घ इ-ध्वनेः पृथग्व्यवहारो नास्ति। परन्तु दीर्घ-इ-ध्वनेः पृथक् लेख्यं प्रतीकमस्ति। परन्तु संस्कृतभाषायाम् इ-ध्वनिः उच्चारणे सर्वदा एकमात्रो ह्स्वश्च।

राजवंशीभाषायाम् इ-स्वरध्वनेः परिवर्तनम् अधो निर्दिश्यते –

(अ + इ)> (ओ + इ), यथा - अति> ओति (परागतस्वरसङ्गतिः)

(इ + आ)> (इ + ए), यथा - शिका >शिके (प्रगतस्वरसङ्गतिः)

(इ + आ + इ)> (इ + ए + इ)> (इ + इ + इ), यथा - विलाति >विलेति >विलिति (अन्यविधस्वसङ्गतिः)

(उ + आ + इ) >(उ + ओ + इ) >(उ + उ + इ), यथा - उड़ानि >उड़ोनि> उड़ुनि (अन्यविधस्वसङ्गतिः)

इ >ए, यथा - सिन्दूर >सेन्दूर, हिन्दु >हेन्दु, मुछिया> मुछेया

इ >उ, यथा - मरिच >मरुच, पुलिश >पुलुश

इ >आ, यथा – छुटिया> छुँड़ा (नोयाखाली-उपभाषा)

इ-ध्वनेः आगमः अपिनिहितिः वा –

आजि >आइज >आज

कालि> काइल >काल

करिया >कइर्या >करे

भाविया >भाइव्या> भेवे

उ – राजवंशीभाषायां तथा संस्कृतभाषायाम् उध्वनिः उच्चसंवृतः पश्चात्स्वरध्वनिश्च। आवुल-कालाम्-मञ्जुर्-मोर्शेद्-महाभागैः कथितं वङ्गभाषायां तथा राजवंशीभाषायां पश्चात्स्वरध्वनिः वृत्ताकृतिः। एतस्य ध्वनेः उच्चारणसमये जिह्वामूलं द्रुतम् ऊर्ध्वं समागम्य नासिकागह्वरं रुद्धं विदधाति। ओष्ठः साधारणतया निरपेक्षो वृत्ताकारको भवति, परन्तु क्वचिद् ओष्ठः स्वल्पतया विस्तृतिम् अपि लभते। ओ-स्वरध्वनेः उच्चारणकाले जिह्वाया आकृतिः यथा वृताकारं भवति अत्रापि उ-स्वरध्वनेः उच्चारणसमये समाना एव जिह्वायाः आकृतिः भवति, जिह्वाया आकृतौ विशिष्टं परिवर्तनं किमपि न परिलक्ष्यते। परन्तु सर्वाणि वाक्-प्रत्यङ्गानि जिह्वामूलस्य समीपवर्तीनि तिष्ठन्ति, तेन जिह्वया सृष्टे वृत्ताकारे जिह्वाग्रभागः साधारणस्थित्यपेक्षया तीक्ष्णो भवति, जिह्वाग्रभागश्च निम्नदन्तभागपर्यन्तं पर्यायक्रमेण पश्चाद्भागं प्रति अपसृतो भवति। जिह्वाग्रभाग-गलनाड़ीपश्चाद्भागयोः सङ्कीर्णो मार्गो सर्वेषां पश्चात्स्वरध्वनीनां संगठनाय साधारणवैशिष्ट्यरूपेण तिष्ठति। परन्तु उ-स्वरध्वनेः संगठनसमये इतरेभ्यः पश्चात्स्वरध्वनिभ्यः ईषदुपरि तिष्ठति। इति

राजवंशीभाषायाम् उ-स्वरध्वनेः रूपान्तरम् तथा स्वरसङ्गतिः अधो निर्दिश्यते –

(उ + आ + इ) > (उ + उ + इ), यथा - उड़ानि >उड़ुनि

(इ + आ + इ) > (इ + उ + इ), यथा - निड़ानि >निड़ुनि, पिटानि > पिटुनि

(उ + आ) > (उ + उ), यथा -कुड़ाल>कुड़ुल

(उ + आ) > (उ + ओ), यथा -जुता>जुतो, पुजा >पुजो

(उ + अ) > (उ + उ), यथा -उपड़>उपुड़, पुतल >पुतुल इत्यादि।

पदमध्ये तथा पदान्तिमे विद्यमानात् आ-ध्वनेः अनन्तरम् उ-ध्वनिः तिष्ठति चेत् राजवंशीभाषायाम् उ-ध्वनिः लुप्यते, ध्वनितात्त्विकपरिभाषया एतस्य संज्ञा अस्ति अपिनिहितिः इति। यथा –

सं. साधु > म.व. साउध > आ.व. साधु

सं. आकुल > म.व. आउल > आ.व. आला इत्यादि।

किञ्च, आञ्चलिकवङ्गभाषायाम् उ-ध्वनेः विविधानि रूपान्तराणि परिलक्षितानि भवन्ति। राजवंशीभाषातः तादृशदृष्टान्ताः केचिद् इह उपस्थाप्यन्ते –

उ > हु, यथा - उत्थान > हुत्थान, लाउ > लाहु, मुकुले > मुहुले

उ > इ, यथा – पाकुड़ > पाकिड़ि, आजुलि > आजुरी > आजिलि

उ >अ, यथा – उठानो > अठानो, उपरानो > अपरानो

उ > आ, यथा – बाहु > वाहा

उ > ओ, यथा – पड़ुक > पड़ोक

उ > ए, यथा – नुपुर > नेफुँर इत्यादि।

ए –आवुल-कालाम्-मञ्जुर्-मोर्शेद्-महाभागैः कथितम् उच्च-मध्य-सम्मुख-पर्यायस्य एकः स्वरध्वनिः वङ्गभाषायां तथा राजवंशीभाषायां व्यवह्रियते, स हि ए-ध्वनिः। संस्कृते ए-ध्वनिः उच्च-मध्य-सम्मुखः अर्धसंवृतः स्वरध्वनिः। सम्मुख-अवृत्ताकृति-स्वरध्वनेः गठनकाले ओष्ठः ईषद्विस्तृतः भवति, ओष्ठस्य मध्यवर्ती अन्तरः इ-स्वरध्वनेः गठनकाले विद्यमानात् अन्तरात् ईषद् विस्तृतः तिष्ठति। जिह्वामूलं नासिकागह्वरस्य उन्मोचनस्य मार्गं रुद्धं विदधाति। परन्तु जिह्वामूलं तावदूर्ध्वदेशम् अपि न गच्छति। जिह्वाया आकृतिः बहुलांशे इ-स्वरध्वनेः उच्चारणस्य काले यथा भवति, तथाविधावस्थायाम् एव तिष्ठति। पार्थक्यं केवलम् एतदेव यत् इस्वरध्वन्यपेक्षया एस्वरध्वनेः उच्चारणसमये जिह्वा-ताल्वोः मध्यवर्ति दूरत्वम् अधिकम् एव भवति। जिह्वायां पुरतः तस्य परिमाणं स्थानं च अपेक्षया स्वल्पम् एव भवति। इति।

संस्कृतभाषायाम् ए-ध्वनिः उच्च-मध्य-अर्धसंवृतः सम्मुखस्वरध्वनिः।

वङ्गभाषायां तथा राजवंशीभाषायाम् एध्वनेः रूपान्तरम् अधस्थात् उल्लिख्यते –

ए-ध्वनिः क्वचित् अय़ा-ध्वनौ परिणतो भवति। उदाहरणं यथा -

एक > अय़ाक, मेला > म्याला, मेघ > म्याघ, केश > क्याश, क्षेत > ख्यात, देश > द्याश, तेल > त्याल, गेलो > ग्यालो।

वीरभूमप्रदेशे अपि ए-ध्वनेः क्वचित् अय़ा-ध्वनौ परिणतिःदृश्यते। परन्तु तत्र पदान्ते एव एतस्य प्रवणता अधिकतया परिलक्ष्यते। यथा – छेले > छेल्या इति। क्वचित् पदादौ अपि एतस्य प्रयोगः दृश्यते। यथा – एकटा > अय़ाकटो इत्यादि।

राजवंशीभाषाया उपभाषायाम् अपि एतादृशं रूपान्तरम् ए-ध्वनेः प्राप्यते। यथा चेतन > च्यातन, तेलेङ्गा > त्यालेङ्गा, रेल > राल।

राजवंशीभाषाया उपभाषायाम् ए-ध्वनेः क्वचित् आदौ ओ-ध्वनौ, ततः अ-ध्वनौ परिणतिः अपि दृश्यते। यथा – नारिकेल > नारिकोल > नारिकल इत्यादि।

क्वचित् प्रलम्बितेन उच्चारणेन अपि ए-ध्वनेः अय़ा-ध्वनौ परिणतिः दृश्यते। यथा – टेरा > ट्याआरा, दियेछे > देछे > द्याछे इत्येवम्।

ओ – राजवंशीभाषायां तथा संस्कृतभाषायाम् उभयत्र एव ओध्वनिः उच्च-मध्यः अर्धसंवृतः तथा पश्चात्स्वरध्वनिः।

अर्धसंवृतस्य ओ-स्वरध्वनेः उच्चारणम् अञ्चलभेदे संवृतस्वरध्वनेः उकारस्य उच्चारणस्य सदृशं भवति। अस्य उदाहरणं यथा मयमनसिंह-उपभाषायाम् –

लोक > लुक (मयमनसिंह-उपभाषायाम्)

दोष > दुष (मयमनसिंह-उपभाषायाम्)

वोका > वुका (मयमनसिंह-उपभाषायाम्)

राजवंशीभाषायाम् अन्तर्गता स्वरसङ्गतिः तथा तत्प्रभावेण ओ-ध्वनेः रूपान्तरम् अधो निदिश्यते –

राजवंशीभाषायाम् ओ-ध्वनिः क्वचित्अ-ध्वनौ, क्वचित्उ-ध्वनौ, क्वचिच्च ए-ध्वनौ परिणतो भवति। अस्य उदाहरणं यथा अधस्ताद् –

| राजवंशीभाषा | संस्कृतभाषा |
|---|---|
| कोदाल > कदाल (ओ > अ) | कुद्दालः |
| गोटा > गटा (ओ > अ) | - |
| घोड़ा > घड़ा (ओ > अ) | घोटकः |
| सोजा > सजा (ओ > अ) | ऋजुः |
| सोना > सना (ओ > अ) | स्वर्णम् |
| कोमर > कमर (ओ > अ) | कटिः |
| गोलाम > गलाम (ओ > अ) | - |
| डोवा > डवा (ओ > अ) | - |
| धोवाड़ा > धवाड़ा (ओ > अ) | - |
| ओषुध > एषुध (ओ > ए) | ओषधिः |
| कोन > कुन (ओ > उ) | कः |

अय़ा – निम्नमध्यः, अर्धविवृतः तथा सम्मुखस्वरध्वनिः भवति अयम् अय़ा-ध्वनिः। एतस्य ध्वनेः उच्चारणसमये ओष्ठः साधारणतया निरपेक्षो भवति, परन्तु क्वचिद् ओष्ठः स्वल्पतया विस्तृतिम् अपि लभते। जिह्वामूलम् ऊर्ध्वं समागम्य नासिकागह्वरं रुद्धं विदधाति। अन्येषां सम्मुखस्वरध्वनीनाम् उच्चारणकाले जिह्वाया आकृतिः यथा भवति अत्रापि समाना एव जिह्वायाः आकृतिः भवति। यावत् जिह्वायाः पश्चाद्भागः समान्तरतां न प्राप्नोति तावत्पर्यन्तं मुखगह्वरे जिह्वा स्वल्पतया अधोमुखिनी सती निम्नवर्तिनी तिष्ठति। जिह्वाया अग्रभागः तालुतः ईषद् दूरं तिष्ठति। अधिजिह्वाया विपरीतभागे जिह्वाया अग्रभागः सम्यक् तिष्ठति।

भाषातात्त्विकेन सुकुमार-सेन-महाभागेन अस्य ध्वनेः उत्पत्तिविचारप्रसङ्गे निर्दिष्टम् इत्थम्– एतस्य ध्वनेः उत्पत्तिः द्विधा अभवत् इति वक्तुं शक्यते। प्रथमतः, अन्त्य-मध्ययुगे इध्वनि-अध्वन्योः सन्ध्या मध्यान्त्याक्षरयोः, द्वितीयतः, एकाक्षरोच्चारणे आद्यस्य अक्षरस्य एकारस्य विवृतोच्चारणेन। इति।

## उपसंहृति

भाषा खलु भावप्रकाशस्य सर्वोत्कृष्टः मार्गः। भाषाया भिनत्वं सत्त्वेऽपि अभिन्त्वमस्ति। तमभिन्नत्वं विना भाषा न वोधगम्या स्यात्। पृथिव्यां भाषासु प्राचीनभाषा संस्कृतम्, अन्या एका च नवीना राजवंशी भाषा, उभयोरेव भाषेति। भाषयोः मध्ये बहुविधानि वैशादृश्यानि यथा सन्ति तथैव सन्ति सादृश्यानि। कालप्रभावात् विविधाकारणाच्च भाषायाः परिवर्तनं सङ्घटितमासीत्। यद्वा भवतु, उक्तालोचनात् ज्ञायते भाषा सदैव परिवर्तनशीला। अस्मिन् परिवर्तनचक्रे राजवंशी-संस्कृतयोः भाषयोः मध्ये परिवर्तनं अस्माभिः दृष्टम्। अन्तिमे प्रबन्धकारस्याशा यत्, पारस्पारिकपरिवर्तनेन भाषाद्वयं शनैः शनैः समृद्धिं लब्धीकरोतु इति शिवम्।

## सहायकग्रन्थपञ्जी


1. पाणिनेः पाणिनीयशिक्षा- सम्पा. शिवराज आचार्य कौण्डिन्यायम, चौखाम्बा संस्कृत प्रतिष्ठान, वाराणसी, 2012
2. भर्तृहरेः वाक्यपदीयम् (ब्रह्मकाण्डम्)- सम्पा. शिवशङ्कर अवस्ति, चौखाम्बा विद्याभावन, वाराणसी, 2016
3. वरदाराजस्य लघुसिद्धान्तकौमुदी- सम्पा. आचार्य रघुनाथ शास्त्री, व्याख्या. गोविन्द प्रसाद शर्मा, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2007
4. Chatterji, Suniti Kumar- Kirata-jana-kriti, The Asiatic Society, 2014
5. Sanyal, Charu ch.- The Rajbanshi, N.L publishers, 2013
6. केत, द्विजेन्द्रनाथ- राजवंशी भाषार व्याकरण, कोच राजवंशी साहित्यसभा, कोचडाझाड, आसाम, 2019
7. खा, चौधुरी, आमानतउल्ला आहमद- कोचविहारेर इतिहास, मडार्न वुक एजेन्सि प्राइभेट लिमिटेड, 2013
8. दास, निर्मल- उत्तरबङ्गेर भाषाप्रसङ्ग साहित्यविचार, ओज प्रकाशन, कलकाता, 2016
9. द्विवेदी, कपिलदेव- भाषाविज्ञान एवं भाषाशास्त्र, विश्वविद्यालय प्रकाशनी, वाराणसी, 2015
10. भकत, द्विजेन्द नाथ- राजवंशीभाषा प्रसङ्ग, वनमाली प्रकाशन, असम, 2004
11. भकत, द्विजेन्द्र नाथ- राजवंशीभाषा प्रसङ्ग, सि.इ.एस.आर, गोलकगढ़ज, असम, 2004
12. भकत, द्विजेन्द्र नाथ- राजवंशीभाषार व्याकरण, कोच राजवंशी साहित्यसभा, असम, 2019
13. भकत, द्विजेन्द्र नाथ- राजवंशीभाषा-साहित्येर परिचय, गोलाकगञ्ज, असम, 2012
14. भच्चाचार्य, परेशचन्द्र- भाषाविद्या परिचय, सत्यजित् सान्याल प्रकाशक, कलकाता, 1996
15. राय दीपक कुमार- हाजं भाषा, सोपान पावलिशार्स, कलकाता, 2013
16. राय, दीपक कुमार- राजवंशी समाज आरो संस्कृतिर कथा, सोपान पावलिशार्स, कलकाता, 2014